**अस्त्रजित्** पु० अस्त्रं तदाघातजं व्रणं जयति निवारकत्वात्। (कवाटवेट्) वृक्षभेदे।

**अस्त्रजीविन्** पु० अस्त्रेण जीवति णिनि। अस्त्रव्यापारेण जीविकावति शस्त्रजीव्यादयोऽप्यत्र अण् अस्त्रजीवोऽप्यत्र।

**अस्त्रधारिन्** त्रि० अस्त्रं धारयति धारि–णिनि। अस्त्रधारके। ण्वुल्। अस्त्रधारकोऽप्यत्र।

**अस्त्रमन्त्र** पु० अस्त्राणां प्रयोगसंहारयोर्मन्त्रः। १शस्त्रप्रयोगादिमन्त्रभेदे। "सम्मोहनं नाम सखे! ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्"। "उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रम्" इति च रघुः। तन्त्रोक्ते अङ्गन्यासान्तर्गते फडिति २मन्त्रे च। [ज्ञाताकारके। ण्वुल् अस्त्रमार्जकोऽप्यत्र।

**अस्त्रमार्ज्ज** पु०अस्त्रं मार्ष्टि मृज–अण् उप०स०। शस्त्रतीक्ष्ण-

**अस्त्रयुद्ध** न० ६त०। अस्त्रेण युद्धे।

**अस्त्रविद्** पु०अस्त्रं तत्प्रयोगादि वेत्ति विद्–क्विप् ६त०। शस्त्रप्रयोगाद्यभिज्ञे "सोऽस्त्रविदस्त्रमन्त्रम्" रघुः।

**अस्त्रविद्या** स्त्री ६त०। १अस्त्रप्रयोगसंहारज्ञापकविद्यायाम् २तद्बोधके शास्त्रे च धनुर्वेदशब्दे विवृतिः।

**अस्त्रवेद** पु० अस्त्रस्य तत्प्रयोगादेः ज्ञापकोवेदः शास्त्रम्। धनुर्वेदे तच्छब्दे विवृतिः।

**अस्त्रसायक** पु० अस्त्रं क्षेप्यं सायकइव। १नाराचास्त्रे तस्य सायकतुल्यतया क्षेप्यत्वात्तथात्वम्। अस्यते शत्रुरनेन अस–करणे ष्ट्रन् कर्म्म०। २सर्व्वलौहमये वाणे।

**अस्त्रहीन** त्रि०अस्त्रेण तत्प्रयोगेण वा हीनः। १अस्त्रशून्ये २शस्त्रव्यापारशून्ये वाग्युद्धादौ।

**अस्त्रागार** न० ६त०। आयुधागारे शस्त्रादिस्थापनगृहे।

**अस्त्राघात** पु० ६त०। अस्त्रेणाघाते।।

**अस्त्राहत** त्रि०अस्त्रेणाहतः। १शस्त्रहते २शस्त्रेण क्षते च।

**अस्त्रिन्** त्रि० अस्त्रं धनुरस्यास्ति इनि। १धनुर्द्धरे, २शस्त्रधारिमात्रे च। "अस्त्रीजनः पुनरनेन कृतः किल स्त्री" उद्भटः।

**अस्थाग** त्रि० अस्थामस्थितिं गच्छति गम–ड। अगाधे हेम०।

**अस्थान** न० अप्राशस्त्ये न०त०। अपकृष्टस्थाने अयोग्यस्थाने "अस्थाने पततामतीव महतामेतादृशी स्याद्गतिः" सा०द०।

**अस्थाने** अव्य० स्थाने युक्तं न०त०। अयुक्ते।

**अस्थायिन्** त्रि० विरोधे न०त०। चञ्चले स्त्रियां ङीप्।

**अस्थावर** त्रि० विरोधे न०त०। स्थावरभिन्ने जङ्गमे। "प्रपौत्रपर्य्यन्तरहितस्य मृतस्य विभक्ताविभक्तस्थावरास्थावरधने पत्नी प्रथममधिकारिणीति दायभागानुसारिणः।

**अस्थि** न०असते अस+क्थिन्। मांसाभ्यन्तरस्थे (हाड़) इति ख्याते धातुभेदे। अस्थिस्वरूपाद्युक्तं भावप्रका०। "मेदोयत्स्वाग्निना पक्वं वायुना चातिशोषितम्। तदस्थिसंज्ञां लभते स सारः सर्व्वविग्रहे। अभ्यन्तरगतैः सारैर्यथा-तिष्ठन्ति भूरुहाः। अस्थिसारैस्तथा देहाध्रियन्ते देहिनां ध्रुवम्। तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम्। अस्थीनि न विनश्यन्ति सारा एतानि सर्व्वथा"। अथास्थ्नां संख्यामाह। "शल्यतन्त्रेऽस्थिखण्डानां शतत्रयमुदाहृतम्। तान्येवात्र निगद्यन्ते तेषां स्थानानि यानि च। सविंशतिशतन्त्वस्थ्नां शाखासु कथितं बुधैः। पार्श्वयोः श्रोणिफलके-वक्षःपृष्ठोदरेषु च। जानीयाद्द्विषगेतेषु शतं सप्तदशोत्तरम्। ग्रीवायामूर्द्धगां विद्यादस्थ्नां षष्टिं त्रिसंयुताम्"। तत्र शाखागतान्याह। "एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश पादतले पञ्चास्थिशलाकास्तदाधारभूतमेकमस्थि। एवं षट् कूर्चे द्वे २ गुल्फे द्वे २ पार्ष्णावेकैकं २जङ्घयोर्द्वे २ जान्वोरेकैकम् २ एवं त्रिंशदेकस्मिन् सक्थिनि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। अथ पार्श्वादिगतान्याह। "पार्श्वयो षट्त्रिंशत् ३६ षट्त्रिंशत् ३६। शिश्ने भगे वा एकं १ नितम्बयोरेकैकं २ त्रिके एकम् १ वक्षस्यष्टौ ८ पृष्ठे-त्रिंशत् अक्षकसंज्ञे द्वे २" योगात् ११७। अथ ग्रीवोर्द्ध्वगतान्याह। ग्रीवायां नव ९कण्ठनाड्यां चत्वारि ४ हन्वोरेकैकं २ दन्तेषु द्वात्रिंशत् ३२ नासायां त्रीणि ३ तालुन्येकं १ गण्डयोरेकैकं २ कर्णयोरेकैकं २ शङ्खयोरेकैकं २शिरसि षट्। एतान्यस्थीनि पञ्चविधानि भवन्ति तानि यथा "तरुणानि कपालानि रुचकानि भवन्ति च। वलयान्यपि तानि स्युर्नलकानि च कानि चित्। अक्षिकोषस्तुति घ्राणग्रीवासु तरुणानि हि। शिरःशङ्खकपोलेषु तालव्य-सप्रोथजादिषु। कपालानि भवन्त्येषु, दन्तेषु रुचकानि च। प्रायः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु। पादयोर्वलयानि स्युर्नलकानि ब्रुवेऽधुना। हस्तपादाङ्गुलितले कूर्च्चे च मणिबन्धयोः। बाहुजङ्घाद्वये चापि जानीयान्नलकानि तु"। अथैषां प्रयोजनमाह "मांसान्यन्त्राणि बद्धानि शिराभिः स्नायुभिस्तथा। अस्थीन्यालम्बनं कृत्वा न शीर्य्यन्ते पतन्ति न" सुश्रुते। याज्ञ० तु "प्राधान्यात् अन्यायासंख्याऽभिहिता यथा। "स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः। पाणिपादशलाकाश्च तासां स्थानचतुष्टयम्। षष्ट्यङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम्। चत्वार्य्यरत्निकास्थीनि जङ्घयोस्तावदेव तु। द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे। अक्ष-